

Central Board of Secondary Education

# Question Paper 2015

[Official]

By

AglaSem
www.schools.aglasem.com

AglaSem Schools

**SET-4**

**Series SSO**

कोड नं. **49**

**Code No.**

रोल नं.
Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

परीक्षार्थी कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें ।

Candidates must write the Code on the title page of the answer-book.

- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **12** हैं ।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए कोड नम्बर को छात्र उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें ।
- कृपया जाँच कर लें कि इस प्रश्न-पत्र में **12** प्रश्न हैं ।
- **कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें ।**
- इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है । प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जाएगा । 10.15 बजे से 10.30 बजे तक छात्र केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे ।
- Please check that this question paper contains **12** printed pages.
- Code number given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate.
- Please check that this question paper contains **12** questions.
- Please write down the Serial Number of the question before attempting it.
- 15 minute time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the students will read the question paper only and will not write any answer on the answer-book during this period.

http://schools.aglasem.com/

# संस्कृतम् (ऐच्छिकम्)

# SANSKRIT (Elective)

*समयो : होरात्रयम्* | *पूर्णाङ्काः : 100*

*निर्धारित समय : 3 घण्टे* | *अधिकतम अंक : 100*

*Time allowed : 3 hours* | *Maximum Marks : 100*

AglaSem Schools

*निर्देशाः :*

*निर्देश :*

***Instructions :***

*संकेताभावे सर्वेषां प्रश्नानामुत्तराणि, संस्कृतेनैव लेखनीयानि ।*

*जहाँ संकेत न हो, वहाँ सभी प्रश्नों के उत्तर संस्कृत में ही लिखें ।*

*Answer all questions in Sanskrit, unless instructions are given otherwise.*

*अस्मिन् प्रश्नपत्रे **चत्वारः** खण्डाः सन्ति ।*

*इस प्रश्न-पत्र में **चार** खण्ड हैं ।*

*There are **four** sections in this question paper.*

| | | |
|---|---|---|
| खण्डः क | अपठितांश – अवबोधनम् (अपठितांश – अवबोधन) | 15 अङ्काः |
| SECTION A | (Unseen Reading Comprehension) | |
| खण्डः ख | संस्कृतेन रचनात्मकलेखनम् (संस्कृत में रचनात्मक लेखन) | 15 अङ्काः |
| SECTION B | (Writing Skills in Sanskrit) | |
| खण्डः ग | पठितांश – अवबोधनम् संस्कृतसाहित्यस्य परिचयः च | |
| | (पठितांश – अवबोधन एवं संस्कृत साहित्य परिचय) | 40+10=50 अङ्काः |
| SECTION C | (Reading Comprehension and Introduction to History of Sanskrit Literature) | |
| खण्डः घ | छन्दोऽलङ्काराः (छन्द एवं अलङ्कार) | 20 अङ्काः |
| SECTION D | (Metres and Figures of Speech) | |

http://schools.aglasem.com/

AglaSem Schools

## खण्डः क (SECTION A)
## अपठितांश – अवबोधनम्
## अपठितांश – अवबोधन
## Unseen Reading Comprehension

*15 अङ्काः*

**1.** अधोलिखितम् अनुच्छेद**द्वयं** पठित्वा प्रदत्तान् प्रश्नान् संस्कृतेन उत्तरत :
निम्नलिखित **दोनों** अनुच्छेदों को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में दीजिए :
Read the following **two** passages and answer the given questions in Sanskrit :

(क) **प्रथमः अनुच्छेदः**

सततम् अभ्यासं कृत्वा कुप्रवृत्तिषु विजयं प्राप्य शुद्धचित्तेन आत्मदेशं प्रति अग्रेसरणमेव आध्यात्मिकोत्थानस्य सुदृढं सोपानम् अस्ति । आत्मनः अनुसन्धानेन स्वकीयस्य स्वाभाविकस्य साक्षात्कार एव ब्राह्म्याः स्थितिः कथ्यते । एवं च व्यक्तिः भवति परिपूर्णा । एषा उदात्ता स्थितिः पराभक्तिः कथ्यते ।

**प्रश्नाः**

(अ) एकपदेन उत्तरत ।
एक शब्द में उत्तर दीजिए ।
Answer in one word. $\frac{1}{2} \times 2 = 1$

(i) व्यक्तिः कीदृशी भवति ?
(ii) 'अस्ति' इति क्रियायाः कर्तृपदं किम् ?

(ब) पूर्णवाक्येन उत्तरत ।
पूर्ण वाक्य में उत्तर दीजिए ।
Answer in a complete sentence. 2

पराभक्तिः का कथ्यते ?

(स) यथानिर्देशम् उत्तरत ।
यथानिर्देश उत्तर दीजिए ।
Answer as directed. $\frac{1}{2} \times 4 = 2$

(i) 'शिथिलम्' अस्य कः पर्यायः अत्र प्रयुक्तः ?
(ii) 'पराजयम्' अस्य विलोमपदं किम् ?
(iii) 'सोपानम्' अस्य विशेषणं किम् ?
(iv) 'व्यक्तिः' अस्य कृते का क्रिया अत्र प्रयुक्ता ?

http://schools.aglasem.com/

AglaSem Schools

(ख) **द्वितीयः अनुच्छेदः**

स्वामिविवेकानन्देन कथितम् — "भयेन दु:खानि आगच्छन्ति, भयेन मृत्यु: भवति भयेन एव च दोषा: उत्पद्यन्ते । भयरहितं चरितं तु विपत्तौ अपि मार्गदर्शनं करोति । भयम् अस्ति परतन्त्रता । यथा पराधीन: स्वतन्त्र: भवितुं पीड्यते तथैव भयग्रस्त: प्राणी मनसि व्यथित: भवति । भयेन जीविन: जना: एकाकिनि आत्मानं साहसिनं कथयन्ति, परं यदा आवश्यकता भवति साहसप्रदर्शनस्य तदा इतस्तत: पश्यन्ति, मौना: वा भवन्ति । तेषां मनसि पौन:पुन्येन जायन्ते विविधा: प्रश्ना: । ते आत्मानं निन्दन्ति । यदा वयं बिभीम: तदा मृत्यो: अनुभवं कुर्म:, यदा च साहसं जायते मनसि तदा न केवलं वयम् आनन्दिता भवाम: परं सर्वा: उपलब्धी: लब्धुं क्षमामहे । यावद् वयं भविष्याद् भीता: तावद् वर्तमानं व्यर्थं कुर्म: । अत: भयेऽपि ये कर्मठा: ते एव कथ्यन्ते साहसिका: ।"

**प्रश्ना:**

(अ) एकपदेन उत्तरत ।
एक शब्द में उत्तर दीजिए ।
Answer in one word. *1×2=2*

(i) के आत्मानं साहसिकं कथयन्ति ?

(ii) वयं कां लब्धुं क्षमामहे ?

(ब) पूर्णवाक्येन उत्तरत ।
पूर्ण वाक्य में उत्तर दीजिए ।
Answer in a complete sentence. *2×1=2*

भयेन किं किं जायते ?

(स) यथानिर्देशम् उत्तरत ।
यथानिर्देश उत्तर दीजिए ।
Answer as directed. *1×4=4*

(i) 'जायन्ते' अस्य क: पर्याय: अत्र प्रयुक्त: ?

(ii) 'निन्दन्ति' अस्य कर्तृपदं किम् ?

(iii) 'जना:' अस्य कृते का क्रिया अत्र प्रयुक्ता ?

(iv) 'चरितम्' अस्य विशेषणं किम् ?

(द) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत ।
इस अनुच्छेद के लिए उपयुक्त शीर्षक संस्कृत में लिखिए ।
Write a suitable title for this passage in Sanskrit. *2*

http://schools.aglasem.com/

AglaSem Schools

## खण्डः ख (SECTION B)
## संस्कृतेन रचनात्मकलेखनम्
## संस्कृत में रचनात्मक लेखन
## Writing Skills in Sanskrit

*15 अङ्काः*

**2.** मञ्जूषातः उचितसङ्केतान् गृहीत्वा अधोलिखितां कथां पूरयित्वा पुनः लिखत :

मञ्जूषा से उचित सङ्केत लेकर निम्नलिखित कथा को पूरा कर लिखिए :

Complete and rewrite the following story, with the help of the words given in the box below : *1×10=10*

**कथा**

स्वामिनो रामकृष्णपरमहंसस्य (i) __________ एको योगी तं प्रति ईर्ष्यालुः अभवत् । एकदा स स्वामिनम् अधः कर्तुम् तत्पार्श्वे गत्वा (ii) __________ किमस्ति कोऽपि चमत्कारो भवत्पार्श्वे ? रामकृष्णोऽवदत् – "अहं तु (iii) __________ प्राणी । योगी कथितवान् – "भवान् जलोपरि (iv) __________ शक्नोति किम् ? जलेऽचलन् मारुतिः अपि (v) __________ अलङ्घयत् । अतो भवान् (vi) __________ जलोपरि चल ।" रामकृष्णः प्रत्यवदत् – "नाहं एतत् कर्तुम् क्षमः । परमेश्वर एतद् नादिशति तत्कथं (vii) __________ इमं श्रमं करिष्यामि ।" योगी उच्चस्वरेण प्रत्यब्रवीत् – "अष्टादशवर्षाणि तपः तप्त्वा चमत्कारमिमं लब्धवान् अहम् ।" योगिनः (viii) __________ श्रुत्वा स्वामी प्रत्युदतरत्, "भवान् अष्टादशवर्षाणि जीवनं वृथा अकरोत्, अहं तु नाविकेन (ix) __________ गंगायाः पारं गच्छामि । किं भवतः अष्टादशवर्षाणाम् उपार्जनं नाविकस्य पणद्वयाद् अधिकं अस्ति ?" स्वामिनो वचांसि श्रुत्वा योगी (x) __________ सञ्जातः ।

**मञ्जूषा**

| |
|---|
| चलितुम्, समुद्रम्, अब्रवीत्, पणद्वयेन, निरुत्तरः, परिवर्तितुम्, गर्वोक्तिम्, गङ्गायाः, सामान्यः, ख्यात्या । |

**3.** मञ्जूषातः पदानि चित्वा 'निर्वाचनम्' इति विषयम् अधिकृत्य **पञ्च** वाक्यानि संस्कृतेन लिखत ।

मञ्जूषा से पद चुनकर 'चुनाव' इस विषय पर संस्कृत में **पाँच** वाक्य लिखिए ।

Write **five** sentences in Sanskrit describing 'Election' with the help of the words given in the box below. *1×5=5*

**मञ्जूषा**

| |
|---|
| भारते, गणतन्त्रम्, राजनीतिप्रणाली, निर्वाचितः, भवति, राष्ट्रम्, चालयति, प्रधानमन्त्री, लोकसभायाः, राज्यसभायाः, मनोनीतः, सर्वाधिकसंख्याम्, कुर्वन्ति, प्रयोगम्, मताधिकारस्य, अर्धसंख्यातः, अधिकम् । |

http://schools.aglasem.com/

AglaSem Schools

## खण्डः ग (SECTION C)

## पठितांश – अवबोधनम् संस्कृतसाहित्यस्य परिचयः च

## पठितांश – अवबोधन एवं संस्कृत साहित्य परिचय

## Reading Comprehension and Introduction to History of Sanskrit Literature

*40+10=50 अङ्काः*

**4.** अधोलिखितं पद्यं, गद्यांशं, नाट्यांशं च पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत :

निम्नलिखित पद्य, गद्यांश एवं नाट्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में दीजिए :

Read the following poetry, prose and drama passages and answer the given questions in Sanskrit :

(क) **पद्यम्**

"पापान्निवारयति योजयते हिताय
गुह्यं निगूहति गुणान् प्रकटीकरोति ।
आपद्गतं च न जहाति ददाति काले
सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः ।।"

**प्रश्नाः**

(अ) एकपदेन उत्तरत ।
एक शब्द में उत्तर दीजिए ।
Answer in one word. *$\frac{1}{2} \times 2 = 1$*
(i) किं हिताय योजयते ?
(ii) सखा कान् प्रकटीकरोति ?

(ब) पूर्णवाक्येन उत्तरत ।
पूर्ण वाक्य में उत्तर दीजिए ।
Answer in a complete sentence. *2*

सन्तः सन्मित्रलक्षणं किं प्रवदन्ति ?

(स) यथानिर्देशम् उत्तरत ।
यथानिर्देश उत्तर दीजिए ।
Answer as directed. *1×2=2*
(i) 'प्रकटीकरोति' अस्य कर्तृपदं किम् ?
(ii) 'पुण्यात्' अस्य विलोमपदं किम् ?



http://schools.aglasem.com/

(ख) **गद्यांशः**

"मासोऽयमाषाढः, अस्ति च सायं समयः, अस्तं जिगमिषुः भगवान् भास्करः, अरुणवारिवाहानाम् अभ्यन्तरं प्रविष्टः । कलविङ्काश्चाटकैररुतैः परिपूर्णेषु नीडेषु प्रतिनिवर्तन्ते । वनानि प्रतिक्षणमधिकाधिकां श्यामलतां कलयन्ति । अथ अकस्मात् परितो मेघमाला पर्वतश्रेणीव प्रादुरभूत् । अथ भयानकाकारा (रात्रिः) समस्तं गगनतलं पर्यच्छदीत् ।"

**प्रश्नाः**

(अ) एकपदेन उत्तरत ।
एक शब्द में उत्तर दीजिए ।
Answer in one word. $\frac{1}{2} \times 2=1$

(i) नीडाः कैः परिपूर्णाः आसन् ?

(ii) कानि श्यामलतां कलयन्ति ?

(ब) पूर्णवाक्येन उत्तरत ।
पूर्ण वाक्य में उत्तर दीजिए ।
Answer in a complete sentence. 2
अकस्मात् का प्रादुरभूत् ?

(स) यथानिर्देशम् उत्तरत ।
यथानिर्देश उत्तर दीजिए ।
Answer as directed. $1 \times 2=2$

(i) 'बहिः' अस्य विलोमपदं किम् ?

(ii) 'प्रविष्टः' अस्य कर्तृपदं किम् ?

(ग) **नाट्यांशः**

"*लवः* — (सस्पृहमात्मगतम्) 'अश्वमेध' इति नाम विश्वविजयिनां क्षत्रियाणामूर्जस्वलः सर्वक्षत्रपरिभावी महान् उत्कर्षनिकषः । (नेपथ्ये)
योऽयमश्वः पताकेयमथवा वीरघोषणा ।
सप्तलोकैकवीरस्य दशकण्ठकुलद्विषः ।।

*लवः* — (सगर्वम्) अहो सन्दीपनान्यक्षराणि ।

*बटवः* — किमुच्यते ? प्राज्ञः खलु कुमारः ।

*लवः* — भोः भोः । तत्किमक्षत्रिया पृथिवी ? यदेवमुद्घोष्यते ? (नेपथ्ये) रे रे महाराजं प्रति कः क्षत्रियः ?

http://schools.aglasem.com/

**प्रश्नाः**

(अ) एकपदेन उत्तरत ।
एक शब्द में उत्तर दीजिए ।
Answer in one word. $\frac{1}{2} \times 2 = 1$

(i) महान् उत्कर्षनिकषः कः ?
(ii) कुमारः कीदृशः ?

(ब) पूर्णवाक्येन उत्तरत ।
पूर्ण वाक्य में उत्तर दीजिए ।
Answer in a complete sentence. *2*

वीरघोषणा कस्य अस्ति ?

(स) यथानिर्देशम् उत्तरत ।
यथानिर्देश उत्तर दीजिए ।
Answer as directed. $1 \times 2 = 2$

(i) अक्षत्रिया का ?
(ii) रावणः अस्य कः पर्यायः ?

**5.** शब्दार्थान् मेलयित्वा लिखत ।
शब्दों का अर्थों से मिलान कीजिए एवं लिखिए ।
Match the words with their meanings and rewrite the same. $\frac{1}{2} \times 4 = 2$

| | **शब्दाः** | | **अर्थाः** |
|---|---|---|---|
| (अ) | एहि | (i) | प्रसादितः |
| (ब) | निशम्य | (ii) | आगच्छ |
| (स) | कौतुकम् | (iii) | श्रुत्वा |
| (द) | तोषितः । | (iv) | आश्चर्यम् । |

**6.** रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत ।
रेखाङ्कित पदों के आधार पर प्रश्न-निर्माण कीजिए ।
Frame questions on the basis of underlined words. $1 \times 4 = 4$

(i) एतदेव सुहृदो लक्षणम् ।

(ii) शिल्पिभिः मनोहरः मण्डपः कारितः ।

(iii) विदुषा कार्यः प्रयत्नो महान् ।

(iv) संसिद्धिमास्थिता जनकादयः ।

http://schools.aglasem.com/

**7.** अधोलिखित**भावार्थयो**ः रिक्तस्थानपूर्तिं मञ्जूषापदसहायतया कुरुत :

निम्नलिखित **दोनों** भावार्थों में मञ्जूषा में दिए गए शब्दों की सहायता से रिक्तस्थानों की पूर्ति कीजिए :

Fill in the blanks in the following **two** explanations with the help of the words given in the box : $\frac{1}{2} \times 12=6$

(अ) "न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते ।
न च सन्न्यसनादेव सिद्धिं समधिगच्छति ।।"

**भावार्थः**

यो जनः पूर्णतया (i) ____________ कर्तुं न (ii) ____________ यो वा निष्फलतां (iii) ____________ मत्वा कर्म करोति एव न, एतौ (iv) ____________ एव जीवने (v) ____________ अपि सफलतां न (vi) ____________ ।

(ब) "उपार्जितानां वित्तानां त्याग एव हि रक्षणम् ।
तटाकोदरसंस्थानां परीवाह इवाम्भसाम् ।।"

**भावार्थः**

यथा कस्मिन् अपि (i) ____________ जलं सीम्नः (ii) ____________ भवति तर्हि (iii) ____________ जलं निष्कासयितव्यं (iv) ____________ तथैव जनस्य (v) ____________ उपार्जितवित्तस्य (vi) ____________ एव अनिवार्यः ।

**मञ्जूषा**

| |
|---|
| मनसि, द्वौ, जलाशये, त्यागः, जीवने, तस्मात्, कर्म, आरभते, कथम्, अधिगच्छतः, अधिकम्, भवति । |

**8.** अधोलिखितयोः **श्लोकयो**ः अन्वययोः रिक्तस्थानपूर्तिं कुरुत :

निम्नलिखित **दोनों** श्लोकों के अन्वयों में रिक्तस्थानों की पूर्ति कीजिए :

Fill in the blanks in the following prose-order-renderings of the **two** verses : $1\frac{1}{2}+1\frac{1}{2}=3$

(अ) "कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः ।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ।।"

**अन्वयः**

इह कर्माणि (i) ____________ एव शतं समाः जिजीविषेत् । एवं (ii) ____________ अन्यथा इतः न अस्ति न (च) नरे कर्म (iii) ____________ ।

http://schools.aglasem.com/

(ब) "नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः ।
शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः ।।"

**अन्वयः**

त्वं नियतं (i) ______________ कुरु हि (ii) ______________ कर्म ज्यायः ।
अकर्मणः च ते शरीरयात्रा अपि न (iii) ______________ ।

**9.** यथानिर्देशम् उत्तरत ।
यथानिर्देश उत्तर दीजिए ।
Answer as directed.

(अ) कर्तृपदं क्रियापदं च चिनुत ।
कर्ता एवं क्रियापद चुनिए ।
Select the subject and the verb. $\frac{1}{2} \times 4 = 2$

(i) "राजा एकदा स्वमनसि अचिन्तयत् ।"

(ii) "अहं मार्गे अग्रसरो भवामि ।"

(ब) विशेषणपदं चिनुत ।
विशेषण पद चुनिए ।
Select the adjective. $1 \times 2 = 2$

(i) 'ज्वाला पूर्वं प्रचण्डतमा आसीत् ।'

(ii) 'हिताधारापि करवालाकारा क्रूराकारा प्रसिद्धा लोकेषु ।'

(स) अधोलिखितपंक्तिषु रेखाङ्कितसर्वनामपदे काभ्यां प्रयुक्ते ?
निम्नलिखित पंक्तियों में रेखाङ्कित सर्वनाम पद किनके लिए प्रयुक्त हुए हैं ?
In the following lines for whom are the underlined pronouns used ? $1 \times 2 = 2$

(i) 'एवंविधयापि चानया कथमपि दैववशेन परिगृहीताः ।'

(ii) 'विक्रमेणाऽस्मानाह्वातुं प्रेषितस्त्वम् ।'

(द) अधोलिखितपंक्तिभ्यां 'अल्पाः' तथा 'स्वीकुर्वन्ति' इति पदयोः समानार्थके पदे चित्वा लिखत :
निम्नलिखित पंक्तियों में से 'थोड़े' तथा 'स्वीकारते हैं' पदों के समानार्थक पद चुनकर लिखिए :
Select and write the synonyms of the words 'अल्पाः' and 'स्वीकुर्वन्ति' from the following lines : $1 \times 2 = 2$

(i) 'वृणते हि विमृश्यकारिणम् ।'
(ii) 'विरला हि तेषामुपदेष्टारः ।।'

http://schools.aglasem.com/

(य) कः कं कथयति ?
कौन किसको कह रहा है ?
Who is saying this to whom ? $\frac{1}{2} \times 4=2$

(i) 'अपरिणामोपशमो दारुणो लक्ष्मीमदः ।'

(ii) 'अमङ्गलमिव उपघ्नन्ति विश्वासम् ।'

**10.** (अ) अधोलिखितलेखकानाम् कस्यापि **एकस्य** काव्यस्य नाम लिखत :
निम्नलिखित लेखकों के किसी **एक** काव्य का नाम लिखिए :
Write the name of any **one** work of each of the following poets : *1×5=5*

दाराशिकोहः, भर्तृहरिः, हृषीकेशो भट्टाचार्यः, भारविः, अम्बिकादत्तव्यासः ।

(ब) अधोलिखितरचनानां लेखकानां नामानि लिखत :
निम्नलिखित रचनाओं के लेखकों के नाम लिखिए :
Write the names of the authors of the following works : *1×5=5*

प्रबन्धपारिजातः, कादम्बरी, पाषाणी कन्या, सौन्दर्यलहरी, चारुदत्तम् ।

## खण्डः घ (SECTION D)
## छन्दोऽलङ्काराः
## छन्द एवं अलङ्कार
## Metres and Figures of Speech

*10+10=20 अङ्काः*

**11.** (अ) प्रश्नान् उत्तरत ।
प्रश्नों के उत्तर दीजिए ।
Answer the questions. *1×2=2*

(i) 'रामः' अत्र 'मः' इति लघुः गुरुः वा ?

(ii) यगणस्य स्वरूपं लिखत ।

(ब) अधोलिखितपरिभाषाः पूरयत :
निम्नलिखित परिभाषाओं को पूरा कीजिए :
Complete the following definitions : *1×4=4*

(i) स्याद् ___________ यदि तौ जगौ गः ।

(ii) उक्ता वसन्ततिलका ___________ ।

(iii) जतौ तु वंशस्थमुदीरितं ___________ ।

(iv) ननमयययुतेयं ___________ लोकैः ।

http://schools.aglasem.com/

AglaSem Schools

(स) अधोलिखितपंक्त्योः किं किं छन्दः ?

निम्नलिखित पंक्तियों में कौन कौन-सा छन्द है ?

What is the metre in the following lines ? *1×2=2*

(i) 'पश्चात्पुच्छं वहति विपुलं तच्च धूनोत्यजस्रम् ।'

(ii) 'शरीरमात्रेण नरेन्द्र तिष्ठन् ।'

(द) **एकस्य** छन्दसः उदाहरणं लिखत :

**एक** छन्द का उदाहरण लिखिए :

Write an example of any **one** of the metres : *2*

अनुष्टुप्, शार्दूलविक्रीड़ितम् ।

**12.** (अ) कस्यचि**देकस्य** शब्दालङ्कारस्य सोदाहरणं लक्षणं लिखत :

किसी **एक** शब्दालंकार का सोदाहरण लक्षण लिखिए :

Write the definition and example of any **one** of the figures of speech : *3*

अनुप्रास:, श्लेषः ।

(ब) केवल**मेकस्य** अर्थालङ्कारस्य लक्षणमुदाहरणं च लिखत :

केवल **एक** अर्थालङ्कार का लक्षण एवं उदाहरण लिखिए :

Define and illustrate any **one** of the figures of speech : $1\frac{1}{2}+1\frac{1}{2}=3$

रूपकम्, अर्थान्तरन्यासः ।

(स) अधोदत्तपंक्त्योः अलङ्कारं निर्दिशत :

निम्नलिखित पंक्तियों में अलङ्कार का निर्देश कीजिए :

Indicate the figure of speech in the following lines : *1×2=2*

(i) 'निजहृदि विकसन्तः सन्ति सन्तः कियन्तः ।'

(ii) 'प्रोद्दीप्ते भवने च कूपखननं प्रत्युद्यमः कीदृशः ?'

(द) अधोलिखितपरिभाषा**द्वयं** पूरयत :

निम्नलिखित **दोनों** परिभाषाओं को पूर्ण कीजिए :

Complete the following definitions of the **two** figures of speech : *1×2=2*

(i) सत्यर्थे पृथगर्थायाः ________________ ।

________________________________ ।।

(ii) भवेत्संभावनोत्प्रेक्षा ________________ ।

http://schools.aglasem.com/

Central Board of School Education

# Marking Scheme 2015

[Official]

AglaSem Schools

# अंक-योजना (Marking Scheme) XII Class 2015
## संस्कृतम् ( Sanskrit Elective) Set 4 (**Code 49**)

कृपया ध्यान दीजिए ः

1। कुछ प्रश्नों के विकल्पात्मक उत्तर भी हो सकते हैं। इस अंक योजना में दिए गए उत्तर निदर्शनात्मक हैं। इनके अतिरिक्त भी संदर्भानुसार सही उत्तर हो सकते हैं, अतः अंक दिए जाएँ।

2। अनुच्छेद अथवा श्लोकों पर आधारित प्रश्न अवबोधनात्मक हैं। विद्यार्थी अनुच्छेद में दिए गए शब्दों के स्थान पर पर्यायवाची शब्दों का प्रयोग भी कर सकते हैं इसके लिए भी अंक दिए जाएँ। विद्यार्थी उत्तर देते समय उपयुक्त विभक्ति अथवा वचन का प्रयोग नहीं करते तो अंशतः अंक काटे जाएँ संपूर्ण नहीं।

3। त्रुटिपूर्ण वर्तनी अथवा व्याकरणात्मक प्रयोगों के लिए अनुपाततः अंक काटे जाएँ न कि पूरे अंक।

4। आंशिक दृष्टि से सही उत्तरों के लिए भी अंशतः अंक अवश्य दिए जाएँ।

**संकेतात्मक उत्तर व अंक विभाजन ः**

## खण्डः 'क' (Section-A)(अपठित अवबोधनम्) 15 अङ्काः

1। (क) प्रथमः अनुच्छेदः

(अ) एकपदेन उत्तरत। प्रत्येक भाग के लिए ½ अंक। **½×2=1**

(i) परिपूर्णा

(ii) सोपानम्

(ब) पूर्णवाक्येन उत्तरत - एक प्रश्न । 2 अंक। **2×1=2**

उदात्ता स्थितिः.................।

(स) यथानिर्देशम् उत्तरत- चार प्रश्न ।प्रत्येक भाग के लिए ½ अंक। **½×4=2**

(i) उदात्तम्

(ii) विजयम्

(iii) तस्मिन्

(iv) स्वपन्

(ख) द्वितीयः अनुच्छेदः

(अ) एकपदेन उत्तरत। प्रत्येक भाग के लिए 1 अंक। **1×2=2**

(i) जनाः

(ii) उपलब्धीः

(ब) पूर्णवाक्येन उत्तरत - एक प्रश्न । 2 अंक। **2×1=2**

भयेन दुःखानि................. उत्पद्यन्ते।

(स) यथानिर्देशम् उत्तरत- चार प्रश्न ।प्रत्येक भाग के लिए 1 अंक। **1×4=4**

(i) उत्पद्यन्ते

(ii) ते

(iii) कथयन्ति

(iv) भयरहितं

(द) भयम् अथवा भयरहितजीवनम् अथवा भयत्यागः अथवा अन्य उपयुक्त शीर्षक । **2**

http://schools.aglasem.com/

AglaSem Schools

## खण्डः 'ख' (Section-B)(रचनात्मकं कार्यम्) 15 अङ्काः

**2**। कथालेखनम् - 10 रिक्तस्थान ।प्रत्येकभाग के लिए 1 अंक। **1×10=10**

(i) ख्याता
(ii) अब्रवीत्
(iii) सामान्यः
(iv) चलितुम्
(V) समुद्रम्
(vi) गङ्गायाः
(vii) परिवर्तितुम्
(viii) गर्वोक्तिम्
(ix) पणद्वयेन
(x) निरुत्तरः

**3**। अनुच्छेदलेखनम् **1×5=5**

बच्चों से प्रदत्तविषयाधारित सरल,संक्षिप्त वाक्य अपेक्षित है।केवल वाक्य की शुद्धता देखी जाए।इस प्रश्न का प्रमुख उद्देश्य वाक्य रचना है।वाक्य लघु अथवा दीर्घ हो यह महत्वपूर्ण नहीं।व्याकरणिक दृष्टि से शुद्ध होने पर पूर्ण अंक दिए जाएँ ।मंजूषा में दिए गए शब्द सहायतार्थ हैं, बच्चे शब्द चुने अथवा नहीं -आवश्यक नहीं।वे स्वयं शब्दों का प्रयोग कर वाक्य -निर्माण कर सकते हैं। बच्चे स्वयं भी मंजूषा में दिए गए शब्दों की विभक्तियाँ आदि भी बदल सकते हैं अतः अंक दिए जाएँ।त्रुटियों के अंक अंशतः काटे जाएँ।पूर्णतया शुद्ध होने पर ही **5** अंक दिए जाएँ। प्रत्येक वाक्य के लिए **1** अंक हैं।

## खण्डः 'ग' (Section-C)(पठितांश अवबोधनम्संस्कृतसाहित्यस्य परिचयः च) 50 अंकाः

**4**। (क)**पद्यम्** (अ) एकपदेन उत्तरत - - दो प्रश्न ।प्रत्येक के लिए ½ अंक। **½×2=1**

(i) सन्मित्रं
(ii) गुणान्

(ब) पूर्णवाक्येन उत्तरत - एक प्रश्न के लिए **2** अंक। 2

पापान्निवारयति.................सन्तः।

(स)यथानिर्देशम् उत्तरत - **2** प्रश्न ।

(i) सन्मित्रम् 1
(ii) पापात् 1

(ख)**गद्यांशः** (अ) एकपदेन उत्तरत - - दो प्रश्न ।प्रत्येक के लिए ½ अंक। **½×2=1**

(i) चाटकैररुतैः
(ii) वनानि

(ब) पूर्णवाक्येन उत्तरत - एक प्रश्न के लिए **2** अंक। 2

......मेघमाला पर्वतश्रेणीव......।

(स)यथानिर्देशम् उत्तरत - **2** प्रश्न ।

(i) अभ्यन्तरम् 1
(ii) भास्करः 1

(ग)**नाट्यांशः** (अ) एकपदेन उत्तरत - - दो प्रश्न ।प्रत्येक के लिए ½ अंक। **½×2=1**

(i) अश्वमेधः
(ii) प्राज्ञः

http://schools.aglasem.com/

AglaSem Schools

(ब) पूर्णवाक्येन उत्तरत - एक प्रश्न के लिए 2 अंक। **2**

सप्तलोकैकवीरस्य ......द्विषः।

(स)यथानिर्देशम् उत्तरत - 2 प्रश्न ।

(i) पृथिवी **1**

(ii) दशकण्ठः **1**

5। **शब्दार्थ -संबंधी** इस प्रश्न में बच्चे केवल क्रमसंख्या लिख सकते हैं अंक दिए जाएँ। वर्तनी आदि की दृष्टि से अंक अंशतः ही काटे जाएँ। प्रत्येक भाग के लिए ½ अंक. **½×4=2**

(अ)एहि (ii) आगच्छ

(ब) निशम्य (iii) श्रुत्वा

(स) कौतुकम् (iv) आश्चर्यम्

(द) तोषितः (i) प्रसादितः

6। **प्रश्न निर्माण संवंधी** इस प्रश्न में बच्चे केवल उत्तर लिख सकते हैं। वर्तनी आदि की दृष्टि से अंक अंशतः ही काटे जाएँ। प्रत्येक भाग के लिए1अंक (i) कस्य **1×4=4**

(ii) कैः

(iii) केन

(iv) काम्

7। **भाव-संबंधी** इस प्रश्न में बच्चे केवल उत्तर लिख सकते हैं। प्रत्येक भाग के लिए ½ अंक **½×12=6**

(अ) (i)कर्म (ii) आरभते (iii) मनसि (iv) द्वौ (v) कथम् (vi) अधिगच्छतः

(ब) (i) जलाशये (ii) अधिकम् (iii) तस्मात् (iv) भवति (v) जीवने (vi) त्यागः

8। **अन्वय-संबंधी** इस प्रश्न में बच्चे केवल उत्तर लिख सकते हैं। प्रत्येक भाग के लिए ½ अंक **½×6=3**

(अ) (i) कुर्वन् (ii) त्वयि (iii) लिप्यते

(ब) (i) कर्म (ii) अकर्मणः (iii) प्रसिद्ध्येत्

9। **यथानिर्देशम् उत्तरत** इस प्रश्न में बच्चे केवल उत्तर लिख सकते हैं।

(अ) (i) कर्तृपदं =राजा क्रियापदं = अचिन्तयत् (ii) कर्तृपदं=अहं क्रियापदं = भवामि **½×4=2**

(ब) (i) प्रचण्डतमा (ii) क्रूराकारा **1×2=2**

(स) (i) लक्ष्म्यै (ii) ब्राह्मणाय **1×2=2**

(द) (i) विरलाः (ii) वृणते **1×2=2**

(य) (i) शुकनासः - चन्द्रपीडम् (ii) अश्वत्थदेवः-वृक्षान् **½×4=2**

10। **लेखक व काव्य**।दिए गए उत्तरों के अतिरिक्त भी अन्य उपयुक्त उत्तरों के लिए अंक दिए जाएँ। उत्तरों में वर्तनी आदि की दृष्टि से अनुपाततः अंक काटे जाएँ न कि पूर्ण।प्रत्येक भाग के लिए 1 अंक ।

(अ) **1×5=5**

(i) दाराशिकोहः -समुद्रसंगः

(ii) भर्तृहरिः - नीतिशतकम्

(iii) हृषीकेशो भट्टाचार्यः - प्रबन्धमञ्जरी

(iv) भारविः - किरातार्जुनीयम्

(v) अम्बिकादत्तव्यासः - शिवराजविजयम्

(ब) **1×5=5**

(i) प्रवन्धपारिजातः -भट्टः मधुरनाथशास्त्री

(ii) कादम्बरी -वाणः

(iii) पाषाणीकन्या -चन्द्रशेखरदास वर्मा

(iv) सौन्दर्यलहरी -पण्डितराज जगन्नाथः

(v) चारुदत्तम् -भासः

http://schools.aglasem.com/

AglaSem Schools

## खण्डः 'घ' (Section-D)(छन्दोऽलङ्काराः) 20 अङ्काः

**11। प्रश्नान् उत्तरत।**

(अ) (i) गुरुः (ii) ।ऽऽ 1×2=2

(ब) (i) इन्द्रवज्रा (ii) तभजाजगौ गः (iii) जरौ (iv) मालिनी भोगि... 1×4=4

(स) (i) शिखरिणी 2×1=2

(ii) उपेन्द्रवज्रा

(द) (i) वागर्थाविव ..................परमेश्वरौ ।अथवा यावत्स्वस्थमिदं कलेवरगृहं ..................। अथवा अन्य उपयुक्त उत्तर 2×1=2

**12।** (अ) **शब्दालङ्कार**

(i) अनुप्रासः - अनुप्रासाः शब्दसाम्यम् ।उदाहरण ः निजहृदि विकसन्तः सन्ति ......। 3

**अथवा**

(ii) श्लेष ः - श्लिष्टैः पदैः .................।उदाहरण ः व्रजन्ति ते मूढधियः ......इवेषवः।

(ब) **अर्थालङ्कार**

(i) रूपकम्- रूपकं रूपितारोपो...............। 3

उदाहरणः अस्मिन् महामोहमये कटाहे ..................। **अथवा अन्य उपयुक्त उत्तर**

**अथवा**

(ii) अर्थान्तरन्यासः- सामान्यं वा विशेषेण..............समर्थ्यते सः अर्थान्तरन्यासः।

उदाहरणः यावदर्थपदां वाचमेवमादाय माधवः .................। **अथवा अन्य उपयुक्त उत्तर**

(स) **अलङ्कार** 1×2=2

(i) अनुप्रासः

(ii) अर्थान्तरन्यासः

(द) **परिभाषा** 1×2=2

(i) स्वरव्यञ्जनसंहतेः ............ क्रमेण तेनैवावृत्तिः ............।

(ii) प्रकृतस्य परात्मना।

******************

http://schools.aglasem.com/